# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

## अध्याय ५३

सन्दिश्य राक्षसान्घोरान्रावणोऽष्टौ महाबलान् ।
आत्मानं बुद्धिवैक्लव्यात्कृतकृत्यममन्यत ॥ १॥

स चिन्तयानो वैदेहीं कामबाणसमर्पितः ।
प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ २॥

स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः ।
अपश्यद्राक्षसीमध्ये सीतां शोकपरायणम् ॥ ३॥

अश्रुपूर्णमुखीं दीनां शोकभारावपीडिताम् ।
वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ ४॥

मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम् ।
अधोमुखमुखीं दीनामभ्येत्य च निशाचरः ॥ ५॥

तां तु शोकवशां दीनामवशां राक्षसाधिपः ।
स बलाद्दर्शयामास गृहं देवगृहोपमम् ॥ ६॥

हर्म्यप्रासादसम्बधं स्त्रीसहस्रनिषेवितम् ।
नानापक्षिगणैर्जुष्टं नानारत्नसमन्वितम् ॥ ७॥

काञ्चनैस्तापनीयैश्च स्फाटिकै राजतैस्तथा ।
वज्रवैदूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोहरैः ॥ ८॥

दिव्यदुन्दुभिनिर्ह्रादं तप्तकाञ्चनतोरणम् ।
सोपानं काञ्चनं चित्रमारुरोह तया सह ॥ ९॥

दान्तका राजताश्चैव गवाक्षाः प्रियदर्शनाः ।
हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः ॥ १०॥

सुधामणिविचित्राणि भूमिभागानि सर्वशः ।
दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम् ॥ ११॥

दीर्घिकाः पुष्करिण्यश्च नानापुष्पसमावृताः ।
रावणो दर्शयामास सीतां शोकपरायणाम् ॥ १२॥

दर्शयित्वा तु वैदेहीं कृत्स्नं तद्भवनोत्तमम् ।
उवाच वाक्यं पापात्मा रावणो जनकात्मजाम् ॥ १३॥

दशराक्षसकोट्यश्च द्वाविंशतिरथापराः ।
वर्जयित्वा जरा वृद्धान्बालांश्च रजनीचरान् ॥ १४॥

तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम् ।
सहस्रमेकमेकस्य मम कार्यपुरःसरम् ॥ १५॥

यदिदं राज्यतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम् ।
जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी ॥ १६॥

बहूनां स्त्रीसहस्राणां मम योऽसौ परिग्रहः ।
तासां त्वमीश्वरी सीते मम भार्या भव प्रिये ॥ १७॥

साधु किं तेऽन्यया बुद्ध्या रोचयस्व वचो मम ।
भजस्व माभितप्तस्य प्रसादं कर्तुमर्हसि ॥ १८॥

परिक्षिप्ता समुद्रेण लङ्केयं शतयोजना ।
नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १९॥

न देवेषु न यक्षेषु न गन्धर्वेषु नर्षिषु ।
अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ २०॥

राज्यभ्रष्टेन दीनेन तापसेन गतायुषा ।
किं करिष्यसि रामेण मानुषेणाल्पतेजसा ॥ २१॥

भजस्व सीते मामेव भर्ताहं सदृशस्तव ।
यौवनं ह्यध्रुवं भीरु रमस्वेह मया सह ॥ २२॥

दर्शने मा कृथा बुद्धिं राघवस्य वरानने ।
कास्य शक्तिरिहागन्तुमपि सीते मनोरथैः ॥ २३॥

न शक्यो वायुराकाशे पाशैर्बद्धं महाजवः ।
दीप्यमानस्य वाप्यग्नेर्ग्रहीतुं विमलां शिखाम् ॥ २४॥

त्रयाणामपि लोकानां न तं पश्यामि शोभने ।
विक्रमेण नयेद्यस्त्वां मद्बाहुपरिपालिताम् ॥ २५॥

लङ्कायां सुमहद्राज्यमिदं त्वमनुपालय ।

अभिषेकोदकक्लिन्ना तुष्टा च रमयस्व माम् ॥ २६ ॥

दुष्कृतं यत्पुरा कर्म वनवासेन तद्गतम् ।
यश्च ते सुकृतो धर्मस्तस्येह फलमाप्नुहि ॥ २७ ॥

इह सर्वाणि माल्यानि दिव्यगन्धानि मैथिलि ।
भूषणानि च मुख्यानि तानि सेव मया सह ॥ २८ ॥

पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे ।
विमानं रमणीयं च तद्विमानं मनोजवम् ॥ २९ ॥

तत्र सीते मया सार्धं विहरस्व यथासुखम् ।
वदनं पद्मसङ्काशं विमलं चारुदर्शनम् ॥ ३० ॥

शोकार्तं तु वरारोहे न भ्राजति वरानने ।
अलं व्रीडेन वैदेहि धर्मलोप कृतेन ते ॥ ३१ ॥

आर्षोऽयं दैवनिष्यन्दो यस्त्वामभिगमिष्यति ।
एतौ पादौ मया स्निग्धौ शिरोभिः परिपीडितौ ॥ ३२ ॥

प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ।
नेमाः शून्या मया वाचः शुष्यमाणेन भाषिताः ॥ ३३ ॥

न चापि रावणः कां चिन्मूर्ध्ना स्त्रीं प्रणमेत ह ।
एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम् ॥ ३४ ॥

कृतान्तवशमापन्नो ममेयमिति मन्यते ॥ ३५ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com